## प्रादस्वाङ्गं सञ्ज्ञायाम् । (१८३/३९१७)

प्रादुत्तरपदमस्वाङ्गवाचि सञ्ज्ञायां विषयेऽन्तोदात्तं भवति । [1]प्रकोष्ठम् । प्रगृहम् । प्रद्वारम् । अस्वाङ्गम् इति किम् ? प्रहस्तम् । प्रपदम् । सञ्ज्ञायाम् इति किम् ? प्रपीठम्[2] ॥

## निरुदकादीनि च । (१८४/३९१८)

निरुदकादीनि च शब्दरूपाण्यन्तोदात्तानि भवन्ति । निरुदकम् । निरुलपम् । निरुपलम् [3]इत्यन्ये पठन्ति । निर्मशकम् । निर्मक्षिकम् । एषां प्रादिसमासो बहुव्रीहिर्वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । [4]निष्कालकः । निष्कान्तः [5]कालकात् इति कन्प्रत्ययान्तेन कालशब्देन प्रादिसमासः । निष्कालिकः इत्यन्ये पठन्ति । [6]निष्पेषः । दुस्तरीपः । '[7]अवितॄस्तॄतन्त्रिभ्य ईः (उ. ४४६), तरीः[8] । तां[9] पाति इति तरीपः । कुत्सितः तरीपः दुस्तरीपः । [10]निस्तरीपः इति केचित् पठन्ति । अपरे निस्तरीकः इति । ते[11] तरीशब्दान्ते बहुव्रीहौ कपं कुर्वन्ति । निरजिनम् । उदजिनम् । [12]उपाजिनम् । 'परेर्हस्तपादकेशकर्षाः' (ग.सू. १७५) । परिहस्तः । परिपादः । [13]परिकेशः । परिकर्षः । निरुदकादिराकृतिगणः ॥

## अभेर्मुखम् । (१८५/३९१९)

अभेरुत्तरं मुखमन्तोदात्तं भवति । अभिमुखः । बहुव्रीहिरयम् प्रादिसमासो वा । अव्ययीभावे तु समासान्तोदात्तत्वेनैव सिद्धम् । 'उपसर्गात् स्वाङ्गम्' (६. २. १७७/३९११) इति सिद्धे [14]वचनमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च । [15]अभिमुखा शाला ॥

## अपाच्च । (१८६/३९२०)

अपाच्चोत्तरं मुखमन्तोदात्तं भवति । [16]अपमुखः । अपमुखम् । अव्ययीभावोऽप्यत्र प्रयोजयति । तत्रापि हि 'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' (६. २. ३३/३७६७) इत्युक्तम् । योगविभागः उत्तरार्थः ।

## स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च । (१८७/३९२१)

स्फिग पूत वीणा अञ्जस् अध्वन् कुक्षि इत्येतान्युत्तरपदानि सीरनामानि च नामशब्दश्चापादुत्तराण्यन्तोदात्तानि भवन्ति । अपस्फिगम् । अपपूतम् । अपवीणम् । अपाञ्जः । [17]अपाध्वा । 'उपसर्गादध्वनः'

---

1. प्रकोष्ठः क.ड. 2. प्रशमो वृक्षः इत्यधिकम् ह. 3. इति केचित् ब. 4. निष्पालकः ब. 5. कालात् क. 6. निष्पेषम् फ. 7. वाक्यमिदं नास्ति ड. 8. इति इत्यधिकम् ड. 9 च इत्यधिकम् ड. 10. वाक्यमिदं नास्ति फ. 11. च इत्यधिकम् ड. 12. उपाजिनः ब, उपजिनम् क. 13. हरिकेशः ड. 14. पुनर्वचनम् फ. 15. अभिमुखी क. 16. उदाहरणमिदं नास्ति फ. 17. अपाध्वः ड.